# O. P. JINDAL SCHOOL, SAVITRI NAGAR

## Annual Examination (2025 – 2026)

**Class: VIII** **MM: 80**

**Subject: Sanskrit** **Time: 3. Hrs.**

Name: _______________ Roll No.:__________

***Fifteen Minutes Extra will be for reading the Question Paper.***

**निर्देशाः1)** प्रश्नपत्रे चत्वारि खण्डानि सन्ति।

खण्ड 'क' अपठित अवबोधनम् (10 अङ्काः)
खण्ड 'ख' रचनात्मकंकार्यम् (15 अङ्काः)
खण्ड 'ग' अनुप्रयुक्तव्याकरणम् (25 अङ्काः)
खण्ड 'घ' पठित–अवबोधनम् (30 अङ्काः)

2) सर्वेप्रश्नाः अनिवार्याः।
3) प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि।
4) प्रश्नसंख्या अवश्यं लेखनीया।
5) उत्तराणि संस्कृतेन एव लेखनीयानि।

---

### खण्ड 'क' अपठित–अवबोधनम्

**प्र01 निम्नलिखितं गद्यांशं ध्यानेन पठित्वा प्रश्नानाम् उत्तराणि लिखत –** **(10)**

(निम्नलिखित गद्यांश को ध्यान से पढ़कर प्रश्नों के उत्तर संस्कृत भाषा में लिखिए)

सज्जनानाम् आचरणं सदाचारः कथ्यते। सज्जनाः पुरुषाः यानि यानि सत्–कार्याणि कुर्वन्ति, सः सदाचारः कथ्यते। तम् एव च ते शिष्टाचारम् अपि कथयन्ति। कोऽपि बालः न जानाति यत् किं सद्वृत्तम् किं च असद्वृत्तम्। बालः ज्येष्ठान् वृद्धान् च पश्यति। ते वयोवृद्धाः यथा–यथा आचरन्ति बालोऽपि तथैव अचरति।

**I एकपदेन उत्तरत–** (एकपद में उत्तर दीजिए) **(1X2=2)**

i केषाम् आचरणं सदाचारः कथ्यते ?

ii कः सद् – असद्–वृत्तं न जानाति ?

**II पूर्णवाक्येन उत्तरत–** (केवलं प्रश्नद्वयम्) **(2X2=4)**

i बालः कान्– कान् पश्यति ?

ii कः सदाचारः कथ्यते ?

iii बालोऽपि कथम् आचरति ?

**III *अनुच्छेदस्य कृते एकम् शीर्षकं लिखत–(अनुच्छेद के लिए उचित शीर्षक लिखिए)*** **(1X1=1)**

**IV निर्देशानुशारम् उत्तरत–** (केवलं प्रश्नत्रयम्) **(1X3=3)**

i "बालः" अस्य किं क्रियापदम् अत्र प्रयुक्तम् ?

(अ) जानाति (ब) कथ्यते (स) कथयन्ति (द) कुर्वन्ति

ii अनुच्छेदे 'ते' इति कर्तृपदस्य किं क्रियापदम् अत्र प्रयुक्तम ?

(अ) कथयतः (ब) कथयति (स) कथयसि (द) कथयन्ति

iii अनुच्छेदे 'यथैव' इत्यस्य किम् विलोमपदम् अत्र प्रयुक्तम् ?

(अ) तदैव (ब) तथैव (स) यदैव (द) तवैव

iv 'बालः ज्येष्ठान् वृद्धान् च पश्यति।' अस्मिन् वाक्ये किं अव्ययपदम् प्रयुक्तम् ?

(अ) बालः (ब) ज्येष्ठान् (स) च (द) वृद्धान्

## खण्ड–'ख' रचनात्मकं–कार्यम्

**प्र02 मित्रं भ्रातुः विवाह–अवसरे निमन्त्रणार्थम् अधोलिखितं पत्रं मंजूषायाः सहायतया पूरयत– (1X5=5)**

(अपने भाई के विवाह में मित्र को निमंत्रित करने के लिए लिखे गए पत्र को मंजूषा की सहायता से पुनः लिखिए)

सावित्री नगर, तमनार

तिथिः 11/02/2026

प्रिय मित्र मधुरः,
सप्रेम नमोनमः।

अत्र कुशलं तत्र अस्तु। एतद् (1) ------ भवान् अतीव प्रसन्नो (2) ------ यत् मम ज्येष्ठ–भ्रातुः विवाहः अग्रिम–मासस्य मंच–तिथौ निश्चितः। भवतः सपरिवारेण सह (3) ------ अनिवार्या। भवतः (4) ------ प्रतीक्षायाम्। गृहे माता–पित्रोः (5) ------ मम प्रणामः।

भवदीयः मित्रम्
नमिशः

मञ्जूषा –

| चरणयोः, उपस्थितिः, ज्ञात्वा, भविष्यति, आगमनस्य |
|---|

**प्र0 3 अधोदत्तचित्रं दृष्ट्वा मंजूषायां सहायतया पंचवाक्येषु चित्रवर्णनम् कुरुत। (1X5=5)**

(चित्र को देखकर मंजूषा की सहायता से पाँच वाक्यों में संस्कृत में चित्रवर्णन कीजिए)




मञ्जूषा –

| बालौ, खेलन्ति, नेत्रयोः, धावति, बालिका, धावन्ति, पट्टिका, अस्ति, एकेन पादेन, वृक्षः, समीपे, क्रीडास्थलम्, |
|---|

**प्र0 4 अधोलिखितं संवादं मंजूषायां प्रदत्त समुचितशब्दैः पूरयत–** **(1X5=5)**

(निम्नलिखित वार्तालाप को मंजूषा से उचित शब्द चुनकर पुनः लिखिए)

**पितामहः** – अमित! किं करोषि ?

**अमितः** – बीजम् (1) ––––– ।

**पितामहः** – (2) ––––– किमर्थम् आरोपयिष्यसि ?

**अमितः** – मम जीवविज्ञानस्य (3) ––––– अकथयत् यत् सर्वे एव छात्राः स्वगृहे एकं पादपम् आरोपयिष्यन्ति।

**पितामहः** – एतत् तु अति–शोभनम् कार्यम्।

**अमितः** – यदि सर्वे छात्राः एवं करिष्यन्ति तदा वृक्षाणाम् (4) ––––– तु स्वयम् एव दूरी भविष्यति।

**पितामहः** – एतत् कार्यं तु अवश्यम् एव करणीयम्।

**अमितः** – आम्। आम्। सर्वे छात्राः एतत् अवश्यम् (5) ––––– ।

मञ्जूषा –

| |
|---|
| अध्यापिका, करिष्यन्ति, बीजम्, आरोपयामि, अभावः |

## खण्ड– 'ग' अनुप्रयुक्त–व्याकरणम्

**प्र05 अधोलिखित वाक्येषु कोष्ठकात् निर्देशानुसारं वाच्यपरिवर्तनं कुरुत–** **(1X5=5)**

(निम्नलिखित वाक्यों का निर्देशानुसार कोष्ठक से वाच्य–परिवर्तन कीजिए) (केवलं प्रश्नपंचम्)

**i** तेन पाठाः ––––––––। ( पठन्ति, पठ्यन्ते )

**ii** मया भोजनं ––––––––। ( खाद्यन्ते, खाद्यते )

**iii** अनुजेन ––––– दीयते। ( धनम्, धनानि )

**iv** गायिका ––––– गायति। ( गीतम्, गीतानि )

**v** ––––––– किं पठ्यते। ( भवान्, भवता )

**vi** त्वं लेखं –––––––। ( लिखति, लिखसि )

**प्र0 6 अधोप्रदत्त विकल्पेभ्यः शुद्धं प्रकृति–प्रत्ययं चित्वा रिक्तस्थानानि पूरयत–** **(1X4=4)**

(विकल्पों से उचित प्रत्ययान्त शब्द चुनकर रिक्तस्थान की पूर्ति कीजिए) (केवलं प्रश्नचतुष्टयम्)

**i** राधा विद्यालयं **गम् + क्त्वा** पठति।

(अ) गत्वा (ब) गमित्वा

(स) गमत्वा (द) गन्त्वा

ii अहं पाठं **पठितुम्** इच्छामि ।

(अ) पठ् + तुम् (ब) पठ् + तुमुन्

(स) पाठ् + तुम् (द) पठि + तुम्

iii आलोकः पुस्तकालयात् पुस्तकम् **आ + दा + ल्यप्** पठति।

(अ) आदाय (ब) अदाय

(स) आदेय (द) दात्वा

iv बालकः गृहकार्यं **कृतवान्।**

(अ) कृ + तुमुन् (ब) कृ + क्त्वा

(स) कृ + ल्यप् (द) कृ + क्तवतु

v बालकेन पुस्तकम् **पठ् + क्त।**

(अ) पठितम् (ब) पठितः

(स) पठिता (द) पठित्

**प्र0 7 प्रदत्तः मंजूषातः उचितं अव्ययपदं चित्वा लिखत**–(केवलं प्रश्नचतुष्टयम्) **(1X4=4)**

(विकल्पों से उचित अव्ययपद चुनकर रिक्तस्थानपूर्ति कीजिए)

i विद्वान् -------- पूज्यते।

ii त्वं कक्षायाः -------- गच्छ।

iii खगाः आकाशे -------- उड्डयन्ति।

iv जलम् ------ पतति।

v सः वनं -------- अगच्छत्।

मञ्जूषा –

| |
|---|
| ह्यः, नीचैः, सर्वत्र, एव, बहिः |

**प्र0 8 अंकेन लिखितं समयं संस्कृतपदेन लिखत**– (केवलं प्रश्नचतुष्टयम्) **(1X4=4)**

( निम्नलिखित वाक्यों को उचित समयपद में लिखकर रिक्तस्थानपूर्ति कीजिए )

i महेशः सायं ( 6:00 ) -------- वादने क्रीडति।

ii सः नित्यं प्रातः (5:15) -------- वादने उत्तिष्ठति।

iii सः प्रातः (6:30) -------- वादने भ्रमणाय गच्छति।

iv तदा सः (7:45) -------- वादने विद्यालयं गच्छति।

v सः मध्याह्ने (2:15) -------- विद्यालयात् आगच्छति।

**प्र0 9 प्रदत्तविकल्पेभ्यः उचितं उत्तरपदं चित्वा रिक्तस्थानानि पूरयत–** (कोई चार) **(1X4=4)**

(निम्नलिखित प्रश्नों को विकल्पों से उचित उत्तर चुनकर रिक्तस्थानपूर्ति कीजिए )

i ——— अभितः वृक्षाः सन्ति।

(अ) नदीम् (ब) नद्या

(स) नद्याम् (द) नदी

ii ——— सार्धं रामः पठति।

(अ) मया (ब) मह्यम्

(स) मत् (द) अस्माकम्

iii ——— मोदकं रोचते।

(अ) रामः (ब) रामेण

(स) रामाय (द) रामात्

iv कृष्णः ——— अलम्।

(अ) कंसाय (ब) कंसम्

(स) कंसे (द) कंसस्य

v ——— बहिः क्रीडाक्षेत्रम् अस्ति।

(अ) विद्यालयं (ब) विद्यालयात्

(स) विद्यालये (द) विद्यालयस्य

**प्र0 10 प्रदत्तविकल्पेभ्यः उचितं शुद्धपदं चित्वा रिक्तस्थानानि पूरयत–** (कोई चार) **(1X4=4)**

(निम्नलिखित प्रश्नों को विकल्पों से उचित उत्तर चुनकर रिक्तस्थानपूर्ति कीजिए )

i भवान् कुत्र ——— ?

(अ) पठसि (ब) पठामि

(स) पठति (द) पठतः

ii ताः कन्याः चतुराः ———।

(अ) सन्ति (ब) अस्मि

(स) अस्ति (द) स्तः

iii वयम् अवश्यमेव ———।

(अ) करिष्यामि (ब) करिष्यामः

(स) करिष्यावः (द) करिष्यन्ति

iv युवां विद्यालयं ———।

(अ) गच्छसि (ब) गच्छामि

(स) गच्छथ (द) गच्छथः

v तौ लेखं ———।

(अ) लिखतः (ब) लिखति

(स) लिखथ (द) लिखसि

## खण्ड– 'घ' पठित–अवबोधनम्

**प्र0 11 अधोलिखितं गद्यांशं ध्यानेन पठित्वा प्रश्नानाम् उत्तराणि लिखत –**

(निम्नलिखित गद्यांश को ध्यान से पढ़कर प्रश्नों के उत्तर संस्कृत भाषा में लिखिए)

1848 तमे खिस्ताब्दे पुणेनगरे सावित्री ज्योतिबा महोदयेन सह कन्यानां कृते प्रदेशस्य प्रथमं विद्यालयं आरभत। तदानीं सा केवलं सप्तदशवर्षीया आसीत्। 1851 तमे खिस्ताब्दे अस्पृश्यत्वात् तिरस्कृतस्य समुदायस्य बालिकानां कृते पृथक्तया तया अपरः विद्यालयः प्रारब्धः। सामाजिककुरीतीनां सावित्री मुखरं विरोधम् अकरोत्। विधवानां शिरोमुण्डनस्य निराकरणाय सा साक्षात् नापितैः मिलिता। फलतः केचन नापिताः अस्यां रूढौ सहभागिताम् अत्यजन्। एकदा सावित्र्या मार्गे दृष्टं यत् कूपं निकषा शीर्णवस्त्रावृताः तथाकथिताः निम्नजातीयाः काश्चित् नार्यः जलं पातुं याचन्ते स्म। उच्चवर्गीयाः उपहासं कुर्वन्तः कूपात् जलोद्धरणम् अवारयन्।

**I एकपदेन उत्तरत –** (केवलं प्रश्नद्वयम्) (½x2=1)

- i विधवानां शिरोमुण्डनस्य निराकरणाय सा साक्षात् कैः मिलिता ?
- ii के कूपात् जलोद्धरणम् अवारयन् ?
- iii कीदृशीनां कुरीतीनां सावित्री मुखरं विरोधम् अकरोत् ?

**II पूर्णवाक्येन उत्तरत –** (केवलं प्रश्नद्वयम्) (1x2=2)

- i एकदा सावित्र्या मार्गे किं दृष्टम् ?
- ii बालिकानां कृते पृथक्तया तया अपरः विद्यालयः कदा प्रारब्धः ?
- iii कीदृशीनां बालिकानां कृते पृथक्तया तया अपरः विद्यालयः प्रारब्धः ?

**III निर्देशानुसारम् उत्तरत –** (केवलं प्रश्नद्वयम्) (1x2=2)

- i अनुच्छेदे 'बालिकानाम्' इति पदस्य पर्यायपदं किम् ?
  (अ) विधवानाम् (ब) कन्यानाम् (स) कृते
- ii 'एकदा सावित्र्या मार्गे दृष्टम्' अस्मिन् वाक्ये अव्ययपदम् किम् ?
  (अ) मार्गे (ब) दृष्टम् (स) एकदा
- iii "सा केवलं सप्तदशवर्षीया आसीत्" अत्र 'सा' इति सर्वनाम पदं कस्मै प्रयुक्तम् ?
  (अ) सावित्र्यै (ब) नापितैः (स) नार्यैः

**प्र0 12 अधोलिखितं श्लोकांशं ध्यानेन पठित्वा प्रश्नानाम् उत्तराणि लिखत–**

(निम्नलिखित श्लोकांश को ध्यान से पढ़कर प्रश्नों के उत्तर संस्कृत भाषा में लिखिए)

**सुपूर्णं सदैवास्ति खाद्यान्नभाण्डं**
**नदीनां जलं यत्र पीयूषतुल्यम्।**
**इयं स्वर्णवद् भाति शस्यैर्धरेयं**
**क्षितौ राजते भारतस्वर्णभूमिः।।**

**I एकपदेन उत्तरत–** (केवलं प्रश्नद्वयम्) (½x2=1)

- i इयं धरा कैः स्वर्णवद् भाति ?
- ii भारतस्वर्णभूमि कुत्र राजते ?
- iii अत्र किं सदैव सुपूर्णमस्ति ?

**II** **पूर्णवाक्येन उत्तरत–** (केवलं प्रश्नद्वयम्) **(1x2=2)**

i नदीनां जलं कीदृशम् अस्ति ?

ii क्षितौ का राजते ?

iii कुत्र कदा च खाद्यान्नभाण्डं पूर्णम् अस्ति ?

**III** **निर्देशानुसारम् उत्तरत–** (केवलं प्रश्नद्वयम्) **(1x2=2)**

i 'इयं स्वर्णवद् भाति' वाक्ये अत्र क्रियापदम् किम् ?

(अ) भाति (ब) इयं (स) स्वर्णवद्

ii 'पृथिवी' इत्यर्थे श्लोके किम् पर्यायपदम् प्रयुक्तम् ?

(अ) क्षितौ (ब) भाति (स) पूर्णम्

iii 'नदीनाम्' इति पदे का विभक्ति ?

(अ) पंचमी (ब) सप्तमी (स) षष्ठी

**प्र0 13 अधोलिखितं नाट्यांशं ध्यानेन पठित्वा प्रश्नानाम् उत्तराणि लिखत–**

(निम्नलिखित नाट्यांश को ध्यान से पढ़कर प्रश्नों के उत्तर संस्कृत भाषा में लिखिए)

**परमिन्दर्–** आम् एतदपि सर्वथा सत्यम्! आगच्छन्तु नदीतीरे गच्छामः। तत्र चेत् कांचित् शान्तिं प्रप्तुं शक्ष्येम।
(नदीतीरं गन्तुकामाः बालाः यत्र–तत्र अवकरभण्डारं दृष्ट्वा वार्तालापं कुर्वन्ति)

**जोसेफः –** पश्यन्तु मित्राणि यत्र–तत्र प्लास्टिकस्यूतानि अन्यत् चावकरं प्रक्षिप्तमस्ति। कथ्यते यत् स्वच्छता स्वास्थ्यकरी परं वयं तु शिक्षिताः अपि अशिक्षित इवाचरामः अनेन प्रकारेण...........

**वैभवः –** गृहाणि तु अस्माभिः नित्यं स्वच्छानि क्रियन्ते परं किमर्थं स्वपर्यावरणस्य स्वच्छतां प्रति ध्यानं न दीयते

**विनयः –** पश्य–पश्य उपरितः इदानीमपि अवकरः मार्गे क्षिप्यते। (आहूय) महोदये! कृपा कुरुं मार्गे भ्रमद्भ्यः। एतत् सर्वथा अशोभनं कृत्यम्। अस्मद्सदृशेभ्यः बालेभ्यः भवतीसदृशैः एवं संस्कारा देयाः।

**रोजलिन्–** आम् पुत्र! सर्वथा सत्यं वदसि! क्षम्यन्ताम् इदानीमेवागच्छामि।
(रोजलिन् आगत्य बालैः साकं स्वक्षिप्तमवकरम् मार्गे विकीर्णमन्यदवकरं चापि संगृह्य अवकरकण्डोले पातयति)

**I** **एकपदेन उत्तरत–** (केवलं प्रश्नद्वयम्) **(½x2=1)**

i वयं शिक्षिताः अपि कथम् आचराम ?

ii स्वच्छता कीदृशी भवति ?

iii का संस्काराः दीयते ?

**II** **पूर्णवाक्येन उत्तरत–** (केवलं प्रश्नद्वयम्) **(1x2=2)**

i रोजलिन् आगत्य किं करोति ?

ii विनयः रोजलिन् आहूय किं वदति ?

iii अस्माभिः किं क्रियन्ते किं प्रति च ध्यानं न दीयते ?

**III** **निर्देशानुसारम् उत्तरत –** (केवलं प्रश्नद्वयम्) **(1x2=2)**

i "कृपां कुरु" इति कः कथयति ?

**अ)** रोजलिन् **ब)** विनयः **स)** जोसेफः

ii 'दयां' इत्यर्थे संवादे किं शब्दं प्रयुक्तम् ?

अ) दीयते ब) साकम् स) कृपाम्

iii 'पठिताः' इति शब्दस्य पर्यायवाची संवादे किं प्रयुक्तम् ?

अ) शिक्षिताः ब) अशिक्षिताः स) अपठिताः

**प्र० 14 रेखांकितपदानि आधृत्य विकल्पेभ्यः प्रश्ननिर्माणं कुरुत–** (केवलं प्रश्नचतुष्टयं) **(1X4=4)**

(निम्नलिखित रेखांकित पदों को उचित विकल्पों से प्रश्ननिर्माण कीजिए)

i एतानि राज्यानि तु भ्रमणार्थं स्वर्गसदृशानि।

(क) कस्या (ख) कस्मिन्

(ग) कीदृशानि (घ) कस्मात्

ii मातापितरौ नृणां सम्भवे क्लेशं सहेते।

(क) कथम् (ख) कौ

(ग) किम् (घ) कस्य

iii त्रिषु तुष्टेषु सर्वं तपः समाप्यते।

(क) कानि (ख) का

(ग) किम् (घ) कः

iv वायुवेगः सर्वथाऽवरुद्धः आसीत्।

(क) का (ख) कः

(ग) के (घ) कौ

v सूर्यः पश्चिमायां दिशायाम् अस्तं गच्छति।

(क) कस्यां (ख) कस्य

(ग) कस्याः (घ) कया

**प्र० 15 अधोलिखितानां प्रश्नानां मंजूषतः पदानि चित्वा रिक्तस्थानानि पूरयत –** **(½X6=3)**

(निम्नलिखित प्रश्नों को मंजूषा की सहायता से रिक्तस्थान पूर्ति कीजिए)

| गणितज्योतिष, | नौकाम्, | पृथिवी, | तदा, | चला, | अस्तं |
|---|---|---|---|---|---|

i ------ स्वकीये अक्षे घूर्णति।

ii सूर्यः अचलः पृथिवी च ------- ।

iii नौकायाम् उपविष्टः मानवः ------ स्थिरानुभवति।

iv सूर्यः पूर्वदिशायाम् उदेति पश्चिमदिशायां च ------- गच्छति।

v आर्यभटस्य योगदानं ------- संबद्धः वर्तते।

vi यदा पृथिव्याः छायापातेन चन्द्रस्य प्रकाशः अवरुध्यते ----- चन्द्रग्रहणं भवति।

**प्र0 16 कोष्ठकात् उचितं समानार्थकपदं चित्वा लिखत–** (½x6=3)

(कोष्ठक से उचित पर्यायवाची शब्द चुनकर लिखिए)

i पृथिव्याम् ------ ( क्षितौ / पर्वतेषु / त्रिलोक्याम् )

ii सुशोभते ------ ( लिखते / भाति / पिबति )

iii बुद्धिमताम् ------ ( पर्वणाम् / उत्सवानाम् / विपश्चिज्जनानाम् )

iv मयूराणाम् ------ ( शिखीनाम् / शुकानाम् / पिकानाम् )

v अनेकेषाम् ------ ( जनानाम् / वैज्ञानिकानाम् / बहूनाम् )

vi भूधराणाम् ------ ( नदीनाम् / पर्वतानाम् / युतानाम् )

**प्र0 17 उदाहरणानुसारं प्रदेशेन सह तस्य राजधानीं मेलनम् कुरुत–** (½x4=2)

(उदाहरण के अनुसार प्रदेश के साथ उसकी राजधानी का मिलान कीजिए)

| यथा– प्रदेश | राजधानी |
|---|---|
| छत्तीसगढ़ | रायपुर |
| (1) असम | (क) ईटानगर |
| (2) मणिपुर | (ख) शिलाङ्ग |
| (3) मेघालय | (ग) दिसपुर |
| (4) अरुणाचल प्रदेश | (घ) इम्फाल |

**प्र0 18 शुद्धकथनानां समक्षम् *आम्* अशुद्धकथनानां समक्षम च *न* इति लिखत–** (½x6=3)

(उचित वाक्यों के सामने *आम्* और अनुचित वाक्यों के सामने *न* लिखिए)

i आत्मवशं तु सर्वमेव दुःखमस्ति।

ii मनुष्यः सदैव मनः पूतं समाचरेत्।

iii नदीजले निमज्जिताः बालाः प्रसन्नाः भवन्ति।

iv वायुं विना क्षणमपि जीवितुं न शक्यते।

v अभिवादनशीलस्य किमपि न वर्धते।

vi एकेन शुष्कवृक्षेण दह्यमानेन वनं सुपुत्रेण कुलमिव दह्यते।

---000---